# Shri Vinayaka Ashtakam

# શ્રીવિનાયકાષ્ટકમ્

## Document Information

Text title : Vinayaka Ashtakam 2

File name : vinAyakAShTakam2.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Transliterated by : Shankara and P. S. Ramachandran

Proofread by : Shankara, PSA Easwaran

Latest update : December 11, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# Shri Vinayaka Ashtakam

## શ્રીવિનાયકાષ્ટકમ્

નમદ્દેવવૃન્દં લસદ્વેદકન્દં
શિરઃશ્રીમદિન્દું શ્રિતશ્રીમુકુન્દમ્ ।
બૃહચ્ચારુતુન્દં સ્તુતશ્રીસનન્દં
જટાહીન્દ્રકુન્દં ભજેઽભીષ્ટસન્દમ્ ॥ ૧॥

કિલદ્દેવગોત્રં કનદ્ધેમગાત્રં
સદાનન્દમાત્રં મહાભક્તમિત્રમ્ ।
શરચ્ચન્દ્રવક્ત્રં ત્રયીપૂતપાત્રં।
સમસ્તાર્ત્તિદાત્રં ભજે શક્તિપુત્રમ્ ॥ ૨॥

ગલદ્દાનમાલં ચલદ્ભોગિમાલં
ગલામ્ભોદકાલં સદા દાનશીલમ્ ।
સુરારાતિકાલં મહેશાત્મબાલં
લસત્પુણ્ડ્રભાલં ભજે લોકમૂલમ્ ॥ ૩॥

ઉરસ્તારહારં શરચ્ચન્દ્રહીરં
સુરશ્રીવિચારં હૃતાર્ત્તારિભારમ્ ।
કટે દાનપૂરં જટાભોગિપૂરં
કલાબિન્દુતારં ભજે શૈવવીરમ્ ॥ ૪॥

કરારૂઢમોક્ષં વિપદ્ભઙ્ગદક્ષં
ચલત્સારસાક્ષં પરાશક્તિપક્ષમ્ ।
શ્રિતામર્ત્યવૃક્ષં સુરારિદ્રુતક્ષં
પરાનન્દપક્ષં ભજે શ્રીશિવાક્ષમ્ ॥ ૫॥

સદાશં સુરેશં સદા પાતુમીશં
નિદાનોદ્ભવં શાઙ્કરપ્રેમકોશમ્ ।
ધૃતશ્રીનિશેશં લસદ્દન્તકોશં
ચલચ્છૂલપાશં ભજે કૃત્તપાશમ્ ॥ ૬॥

તતાનેકસન્તં સદા દાનવન્તં
    બુધશ્રીકરન્તં ગજાસ્યં વિભાન્તમ્ ।
કરાત્મીયદન્તં ત્રિલોકૈકવૃન્તં
    સુમન્દં પરન્તં ભજેઽહં ભવન્તમ્ ॥ ૭॥

શિવપ્રેમપિણ્ડં પરં સ્વર્ણવર્ણં
    લસદ્દન્તખણ્ડં સદાનન્દપૂર્ણમ્ ।
વિવર્ણપ્રભાસ્યં ધૃતસ્વર્ણભાણ્ડં
    ચલચ્ચારુશુણ્ડં ભજે દન્તિતુણ્ડમ્ ॥ ૮॥

ઇતિ શ્રીનારાયણગુરુવિરચિતં શ્રીવિનાયકાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded by Shankara and P. S. Ramachandran
Proofread by Shankara, PSA Easwaran

*Shri Vinayaka Ashtakam*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*